**संस्कृत-वार्ता:**

**दिनाङ्क :-07.09.2024**

**प्रात: - 06:55**

**उपराष्ट्रपति-यात्रा**

**उपराष्ट्रपति जगदीपधनखड़: अद्य उत्तरप्रदेशे गोरखपुर चित्रकूटयोः मध्यप्रदेशस्य सतनास्थे चित्रकूटस्य च यात्रां करिष्यति। श्रीधनखड़: उत्तरप्रदेशस्य गोरखपुरे नवनिर्मितस्य सैनिकविद्यालयस्य उद्घाटनं करिष्यति।**

**राज्यस्य चित्रकूटस्थे जगद्गुरुरामभद्राचार्यदिव्यङ्गराज्यविश्वविद्यालये आयोजिते 'आधुनिकजीवने ऋषिपरम्परा' इति द्विदिनात्मके राष्ट्रियगोष्ठीयां मुख्यातिथिरूपेण अध्यक्षतां करिष्यति। उपराष्ट्रपतिः मध्यप्रदेशस्य सतनायाः चित्रकूटस्थे दीनदयालशोधसंस्थाने नानाजीदेशमुख वर्यस्य प्रतिमायां श्रद्धांजलिम् अपि अर्पयिष्यति ।**

**तेलङ्गाना-जलाप्लाव**

**केन्द्रीय-कृषि-मन्त्री शिवराज-सिंह-चौहान: गृहराज्यमन्त्री बण्डी-सञ्जयकुमार: च तेलङ्गानाया: खम्मम‌जनपदे जलाप्लावप्रभावितेभ्य: जनेभ्य: सर्वसम्भव-साहाय्याय आश्वासनं प्रदत्तवन्तौ। मन्त्रिणौ खम्मम-जनपदे जलाप्लाव-प्रभावित-क्षेत्राणां नभ:स्थ-सर्वेक्षणं कृतवन्तौ। सहैव मन्त्रिणौ कृषिक्षेत्राणां परीक्षणम् अपि कृतवन्तौ, यत्र जलाप्लावेन सस्यानि विनष्टानि। राज्यस्य-कृषि-मन्त्री टी. नागेश्वर-राव: तथा राजस्वमन्त्री श्रीनिवास-रेड्डी केन्द्रीयमन्त्रिभ्यां सह आस्ताम्। एतन्मध्ये ऋतु-विभागस्य अधिकारिभि: केषुचित् जनपदेषु अतिवृष्टिकारणेन नारङ्गवर्णीय-सञ्चेतना प्रसारिता। आगामि चतुर्दिवसेभ्य: दशजनपदेभ्य: पीतवर्णीय-सञ्चेतना अपि प्रसारिता।**

अमितशाह:

केन्द्रीयगृहमन्त्री अमितशाह: जम्मू-नगरस्य द्विदिवसीय-यात्रासमये जम्मू-कश्मीर-विधानसभा-निर्वाचनम् आधृत्य भाजपेतिदलस्य घोषणापत्रस्य विमोचनेन सह निर्वाचन-प्रचारम् आरब्धवान्। श्रीशाह: भाजपा-दलस्य घोषणापत्रं प्राकाशयत्, यस्मिन् अस्य प्रदेशस्य दलस्य दूरदृष्टिः लक्ष्यानि च निर्दिष्टानि सन्ति। भाजपा-पक्षस्य घोषणा-पत्रस्य उद्घाटने जनसमूहं सम्बोधयन् अमितशाहः अवदत् यत् स्वातन्त्र्यात् आरभ्य जम्मू-कश्मीरम् अस्माकं दलस्य कृते महत्वपूर्णम् अस्ति, तथा च सप्तत्यधिक-त्रिशत इति अनुच्छेदः अधुना इतिहासस्य भागः अस्ति, कदापि पुनः न भविष्यति इति सुदृढीकृतवान्।

गणेशोत्सव:

महाराष्ट्रे मुम्बईं समेत्य सम्पूर्णराज्यम् अद्यारभ्य प्रारभ्यमाणाय दशदिवसीय गणेशोत्सवाय पूर्णरूपेणसज्जितं अस्ति। समाजस्य सर्वेषां वर्गाणां जना: लक्ष-गृहेषु भक्ता: च अस्मिन् शुभावसरे पूजार्थंगणेशप्रतिमा: स्थापयिष्यन्ति ।

ऋतुविभागेन

भारतस्य ऋतुविभागेन-आई.एम.डी. इत्यनेन गुजरात-महाराष्ट्र-पूर्वराजस्थानेषु अतिवृष्टेः पूर्वानुमानं प्रकटितं अस्ति। ऋतु विभागेन उक्तं यत् अद्य कोङ्कन-गोवा-नगरयोः, श्वः तटीय-आन्ध्र-प्रदेश-यनम्-ओडिशा-राज्येषु च प्रचण्डवृष्टिः भविष्यति । विभागेन उक्तं यत् अधुना यावत् पश्चिममध्यप्रदेशे, सौराष्ट्रे, कच्छे, उत्तराखण्डे, पूर्वोत्तरक्षेत्रे, दक्षिणपश्चिमराजस्थाने च आगामिषु षड् दिवसेषु छत्तीसगदे अपि अत्यधिकवृष्टिः सम्भवति।

पैरालिम्पिक

चतुर्विंशत्यधिक द्विसहस्र तम वर्षस्यपेरिस् पैरालिम्पिक क्रीडायां भारतीयस्य होकाटो होटोझे सेमा इत्यनेन ह्यः पुरुषाणां शॉट् पुट् एफ सप्त पञ्चाशत् क्रीडायाः निर्णायक-स्पर्धायां कांस्यपदकं विजितम्। अत्रान्तरे प्रवीणकुमारः पुरुषाणां उच्चकुर्दस्पर्धायां स्वर्णपदकं समर्जितवान् ।

भारतस्य समग्रपदकानां संख्या अधुना सप्तविंशतिः अस्ति यस्मिन् षट् स्वर्णपदकानि, नव रजतपदकानि द्वादश कांस्यपदकानि च सन्ति ।

।।इति वार्ता:।।